# ३. विनोदः

प्रथमः भागः

## पठन्तु, विचिन्त्य वदन्तु

शिक्षकः - **कस्तूरी जायते कस्मात्**
**को हन्ति करिणां कुलम् ।**
**किं कुर्यात् कातरो युद्धे**
**मृगात् सिंहः पलायते ॥**

श्लोकं शृण्वन्तु । अत्र विशेषः कः ?

छात्रः - त्रिषु पादेषु स्थितानां प्रश्नानां समाधानानि चतुर्थपादे एव वर्तन्ते महोदय !
- कस्तूरी जायते कस्मात् ? - **मृगात्** इत्यादिसमाधानानि ।

शिक्षकः - तादृशचाटुश्लोकान् अधुना वयं पठामः।

© SCERT not to be republished

**प्रश्नाः ?**

1. पूर्वपठितं चाटुश्लोकमेकं वदतु ।
2. चाटुश्लोकानां पठनेन किं जायते ?
3. चाटुश्लोकपठनेन मनोल्लासः कथं भवति ?

## उद्देश्यम्

★ चाटुश्लोकानां पठनेन मानसिकानन्दपरिवर्धनम् अन्वयकरणे बुद्धिकुशलतासम्पादनम्, आलोचनाशक्तेः अभिवर्धनम्, छात्रेषु विनोदजननेन संस्कृतभाषाध्ययने रुच्युत्पादनम्।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगाहनम् अभिवर्धयन्तु ।



1. विना गोरसं को रसो भूपतीनाम्
विना गोरसं को रसो भामिनीनाम् ।
विना गोरसं को रसः पण्डितानाम्
विना गोरसं को रसो भोजनानाम् ॥



2. रामस्तत्पुरुषं ब्रूते
बहुव्रीहिं महेश्वरः ।
इतरे मुनयस्सर्वे
कर्मधारयमेव च ॥



3. द्वन्द्वो द्विगुरपि चाहं
मद्गेहे नित्यमव्ययीभावः ।
तत्पुरुष कर्मधारय
येनाहं स्यां बहुव्रीहिः ॥



4. प्रातः प्रातस्समुत्थाय
द्वौ मुनी च कमण्डलू
अत्र क्रियापदं वक्तुम्
अवधिर्ब्रह्मणो वयः ॥



5. स्वयं पञ्चमुखः पुत्रौ
गजाननषडाननौ ।
दिगम्बरः कथं जीवेत्
अन्नपूर्णां विना गृहे ॥

© NCERT not to be republished



6. पाण्डवानां सभामध्ये

दुर्योधन उपागतः ।

तस्मै गां च सुवर्णं च

सर्वाण्याभरणानि च ॥

7. कः कौ के कं कौ कान्

हसति च हसतो हसन्ति हरिणाक्ष्याः ।

अधरः पल्लवमङ्घ्री

हंसौ कुन्दस्य कोरकान्दन्ताः ॥





8. मूर्खो नहि ददात्यर्थं

नरो दारिद्र्यशङ्कया ।

प्राज्ञस्तु वितरत्यर्थं

नरो दारिद्र्यशङ्कया ॥

SCERT not to be republished



9. हतो हनुमता रामः

सीता सा हर्षनिर्भरा ।

रुदन्ति राक्षसास्सर्वे

हा हा राम हतो हतः ॥



10. पश्यः पश्यति पश्यन्तम्

अपश्यन्तं च पश्यति ।

पश्यन्तं परमात्मानं

पश्यापश्यौ न पश्यतः ॥

## विवरणम् -

1. अस्य श्लोकस्य पठनेन यः श्रवणानन्दः प्राप्यते अर्थग्रहणे च इतोऽधिकमानसिकानन्दः लभ्यते । चतुर्षु अपि पादेषु ''गोरसम्'' इति पदप्रयोगेण चमत्कारः एवं नानार्थग्रहणं च सिद्ध्यति । चतुर्षु पादेषु ''को रसः'' इति, पादान्ते षष्ठीतत्पुरुषबहुवचनप्रयोगः पाठकस्य आनन्दं जनयति ।

   अत्र गोरसम् इति पदस्य चतुर्विधाः अर्थाः विद्यन्ते ।

   प्रथमपादे गोशब्दस्य ''भूमिः'' इति, द्वितीयपादे ''केशाः'' इति, तृतीयपादे ''वाक्स्वारस्यम्'' इति, चतुर्थपादे ''पयः दधिघृतम्'' इति विविधार्थास्सन्तीति हेतोः अर्थसमन्वयो भवति ।

2. अनेन श्लोकेन चमत्कारेण साकं समासानां परिचयोऽपि भवति । त्रिभिः समासैः तत्तद्व्यक्तीनाम् अभिप्रायप्रकटनं चमत्कारः।

   ज्योतिर्लिङ्गरूपरामेश्वरशब्दस्य विग्रहवाक्यविषये केचन पण्डिताः एवमभिप्रयन्ति ।

   रामः - रामस्य ईश्वरः रामेश्वरः इति,

   शिवः - रामः ईश्वरः यस्य सः रामेश्वरः इति,

   इतरे मुनयः - रामश्च असौ ईश्वरश्च रामेश्वर इति,

   अत्र तत्पुरुष - बहुव्रीहि - कर्मधारयसमासाः क्रमशः भवन्ति ।

   एकस्यापि पदस्य अर्थवैविध्येन समासवैविध्यं सिद्ध्यति ।

3. अस्मिन् श्लोके षण्णां समासानां नामानि श्रूयन्ते । परं तु अर्थग्रहणे समासप्राधान्यं न भवति । स एव चमत्कारः।

   अहं द्वन्द्वः = पत्नीसहितः, द्विगु = द्वौ गावौ वृषभौ यस्य सः द्विगुः, अव्ययीभावः = व्ययं कर्तुमसमर्थता अर्थात् - दारिद्र्यम्, तस्मात् हे पुरुष ! = तत्पुरुष, कर्मधारय, कर्म = जीवनोपाधिकार्यं, धारय = दापय, बहुव्रीहिः = अधिकशालिधान्ययुक्तः इति तेषां समासपदानाम् अर्थाः भवन्ति । यं कञ्चन श्रेष्ठपुरुषम् एकः निरुद्योगी जीवनोपाधिम् अभ्यर्थयतीति भावः।

4. अस्य श्लोकस्य प्रथमपादे स्थितं क्रियापदं ज्ञातव्यमिति कवेः आशयः। ब्रह्मणः वयः (''चतुर्युगसहस्राणि बह्मणो दिनमुच्यते'' इत्युक्तत्वात्) अर्थात् अस्मभ्यम् अधिकसमयो दीयते । तथापि श्लोकार्थावगमनं दुर्गममित्यर्थः।

   अस्मिन् श्लोके - ''द्वौ मुनी प्रातरेवोत्थाय तयोः कमण्डलू'' इत्यत्र क्रियापदस्य अनुपलब्धेः सम्पूर्णार्थो न सिद्ध्यति ।

   अयमत्र परिष्कारः - 'प्रा' - पूरणे इति धातुः। अतः लट् लकारे 'प्राति प्रातः प्रन्ति' इति भवति । तस्मात् 'प्रातः' = पूरयतः इति अर्थग्रहणेन सम्पूर्णार्थसमन्वयो भवति ।

© SCERT not to be republished

5. भिक्षुकस्य स्वभोजनमेव दुर्लभं भवति । अस्मिन्सन्दर्भे आदिभिक्षोः शिवस्य गृहे विचित्रा परिस्थितिः दृश्यते । स्वयं शिवस्य पञ्चमुखानि, ज्येष्ठपुत्रस्य कुमारस्वामिनः षण्मुखानि, अन्यस्य गणेशस्य गजमुखत्वात् महामुखम् एवं महोदरञ्च । एतेषां प्रतिदिनं पर्याप्तः आहारः कथं लभ्येत इति समस्या उत्पन्ना भवति ।

''अन्नपूर्णां विना गृहे'' इत्यनेन चतुर्थपादेन साभिप्रायविशेष्यकथनेन तत्समस्या निवारिता भवति।

6. अस्मिन् श्लोके क्रियापदं दुर्लभं दृश्यते । पदविभागानुसारं सन्ध्यनुसारं च अन्वयः क्रियते चेत् सम्पूर्णार्थोऽवगम्यते ।

अयमत्र परिष्कारः -

पाण्डवानां, सभामध्ये, यः, अधनः, उपागतः, तस्मै, गां, च, सुवर्णं, च, सर्वाणि आभरणानि, च, अदुः, इत्यनेन अन्वयक्रमेण अर्थस्य अवगमो भवति ।

7. अनेन श्लोकेन शब्दज्ञानम्, धातुज्ञानम्, अलङ्कारज्ञानम् च सिद्ध्यति ।

हरिणाक्ष्याः, कः = अधरः, कं = पल्लवं दृष्ट्वा, अधरस्य आरुण्याधिक्यात् हसति = परिहसति । कौ = पादौ, कौ = हंसौ, गतिसौन्दर्यातिशयात्, हसतः = परिहसतः, के = दन्ताः, कान् = कुन्दस्य कोरकान्, धावल्यातिशयात्, हसन्ति = परिहसन्ति इति भावः। अत्र कवेः वर्णनावैचित्र्यं द्योतितं भवति ।

8. सन्देशात्मकः अयं श्लोकः। अस्मिन् श्लोके मूर्खस्य प्राज्ञस्य च कृत्यं समानमिव भासते । सावधानेन अर्थपरिशीलनेन सत्यार्थः अवगतः भवति ।

मूर्खः नरः दारिद्र्यशङ्कया स्वीयार्थम् अन्येभ्यः न हि ददाति ।

प्राज्ञः नरः अदानदोषात् दारिद्र्यशङ्कया स्वीयार्थम् अन्येभ्यः वितरति इति ।

9. अस्मिन् श्लोके स्थितार्थः व्यवहारविरुद्धः असम्बद्धश्च । परन्तु पदविभागसामर्थ्येन सन्धिबलेन च योग्यार्थः सिद्ध्यति ।

हनुमता + आरामः, एवं हा + आराम इति पदाविभागः क्रियते चेत् अर्थसमन्वयो भवति ।

हनुमता यदा लङ्कायाम् ''अशोकवनम्'' ध्वस्तं कृतं तदा सीता हृष्टा, राक्षसाः दुःखमनुभवन्तीति भावः।

10. एकेनैव धातुप्रयोगेण अवश्यमवगन्तव्यः वेदान्तविषयः अस्मिन् श्लोके चमत्कारतया प्रतिपादितः।

पश्यः = द्रष्टा यः जनः पश्यन्तम् = अन्यं द्रष्टारं पश्यति । स एव पश्यः जनः अपश्यन्तम् = अन्धं च पश्यति ।

एतौ द्वावपि पश्यन्तं परमात्मानम् एतौ उभावपि द्रष्टुम् अशक्तावेव । अनेन द्रष्टुरपि परमात्मदर्शनविषये अन्धप्रायता द्योतिता । अतः यः परमात्मदर्शनं कर्तुं शक्नोति स एव द्रष्टा इति तात्पर्यम् ।



© SCERT not to be republished

## एतानि कुर्वन्तु

### I. भावावगाहनम्, प्रतिस्पन्दनम्

**अ) अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. साधारणश्लोकानां चाटुश्लोकानां मध्ये भेदः कः? वदतु ।

२. छात्राः गणद्वये स्थित्वा एकः चाटून् वदतु अन्यः भावं वदतु ।

३. गोरसं सर्वेषामावश्यकमिति पठितं खलु ! किं तत् सर्वेषां कृते आवश्यकं भवति वा इति चर्चां कुर्वन्तु ।

**आ) अस्मिन् पाठे प्रथमश्लोके विद्यमानानि षष्ठीविभक्तिपदानि चित्वा लिखन्तु ।**

**इ) पाठे श्लोकेषु विद्यमानानि समासनामानि लिखन्तु ।**

**ई) अधः दत्तायाः प्रहेलिकायाः समाधानमालोच्य वदन्तु ।**

**वृक्षाग्रवासी न च पक्षिराजः त्रिनेत्रधारी न च शङ्करोऽयम् ।**
**त्वग्वस्त्रधारी न च सिद्धयोगी जलेन पूर्णो न घटो न मेघः ॥**

**उ) अधः दत्तानां प्रश्नानां समाधानानि पाठाधारेण लिखन्तु ।**

१. ''द्वन्द्वोऽहं द्विगुरपि'' इत्यास्मिन् श्लोके स्थितानि समासनामानि लिखन्तु ।

२. मूर्खप्राज्ञयोः स्थितिं वर्णयन्तु ।

३. प्रातः प्रातस्समुत्थाय इति श्लोकस्य भावं लिखन्तु ।

४. ईश्वरस्य विचित्रपरिस्थितिः का ?

५. ''पाण्डवानां सभामध्ये'' इति श्लोकस्य भावं लिखन्तु ।

### II. भावव्यक्तीकरणम् - सर्जनात्मकता

**अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।**

१. ''द्वन्द्वोऽहं द्विगुरपि च'' इत्यादिश्लोके सामासनामानि दत्तानि । अत्र चमत्कारः कः इति लिखन्तु ।

२. चाटुश्लोकानाम् विशेषताम् आलोच्य लिखन्तु ।

३. हतो हनुमता रामः इति श्लोकस्य अर्थद्वयं स्वीयवाक्यैः लिखन्तु ।

©SCERT not to be republished

## आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. पाठगतानां चाटुश्लोकानां भावान् स्वीयवाक्यैः लिखन्तु ।

२. कः कौ कान् इति श्लोके के के कं कं दृष्ट्वा हसन्ति इति विशदयन्तः जीवने दन्तसौष्ठवस्य प्राधान्यं लिखन्तु ।

## इ) सर्जनात्मकतया समाधानानि लिखन्तु ।

१. भवताम् अभीष्टम् एकं चाटुश्लोकं स्वीकृत्य कथारूपेण लिखन्तु ।

२. अधः दत्तं परिच्छेदं संस्कृतभाषया अनुवदन्तु ।

పూర్వము దశరథుడను రాజు ఉండెను. అతడు అయోధ్యను రాజధానిగా చేసుకుని పాలించెను. అతనికి నలుగురు కుమారులు ఉండిరి. వారిలో పెద్దవాడైన రాముడు పితృభక్తి కలవాడై సత్యవచనుడై ఉండెను. రాముడు తండ్రియొక్క ఆజ్ఞను పాటించుటకు పదునాలుగేండ్లు వనవాసము చేసెను.

వనవాసకాలమందు లంకారాజైన రావణుడు సీతను అపహరించెను. వానరుల సహాయముతో రాముడు రావణుని చంపెను. వనవాసము పూర్తిచేసుకొని సీతతో కలసి అయోధ్యకు తిరిగివచ్చెను.

## ई) प्रशंसात्मकतया प्रतिस्पन्दनं कुर्वन्तु ।

चाटुश्लोकानां मनोरञ्जकत्वं प्रशंसन् सहपाठिनम् उद्दिश्य वदन्तु ।

# III. भाषांशाः

## १. पदजालाभिवृद्धिः

### अ) अधः दत्तानि पदानि उपयुज्य उदाहरणानुसारं वाक्यानि लिखन्तु ।

| | | | | |
|---|---|---|---|---|
| पञ्चमुखः | गजाननः | षडाननः | दिगम्बरः | अन्नपूर्णा |

**उदा** - ईश्वरः पञ्चमुखः इति कीर्तितः ।

### आ) अधः दत्तानि प्रश्नवाचकपदानि रिक्तस्थानेषु समुचितं योजयन्तु ।

(कः कौ के कं कान् )

१. पल्लवं दृष्ट्वा ............ हसति ?

२. ........... दृष्ट्वा अधरः हसति ?

३. दन्ताः ........... दृष्ट्वा हसन्ति ?

४. ............. कुन्दस्य कोरकान् दृष्ट्वा हसन्ति ?

५. पादौ दृष्ट्वा ............... हसतः ?



© SCERT not to be republished

### इ) असम्बद्धपदं चित्वा लिखन्तु ।

१. पितुः, कस्य, हरेः, रामस्य

२. गच्छामः, पिबामः, पृच्छ, लिखामः

३. रमे, मते, हरे, गृहे

४. के, काः, कानि, ते

५. मातामहः, पौत्रः, जनकः, वयस्यः

## २) साहित्यांशाः

### अ) अधः दत्तस्य श्लोकपादस्य गुरुलघुनिरूपणं गणविभजनञ्च अवगच्छन्तु ।

| | | | |
|---|---|---|---|
| U U । | U U । | । U । | U U |
| ना गे न्द्र | हा रा य | त्रि लो च | ना य |
| त | त | ज | ग ग |

- पादस्य अन्ते स्थितः लघुरपि गुरुर्भवतीति कृत्वा लक्षणसमन्वयः ।

- उपरितनश्लोकपादे क्रमेण **'त - त - ज - ग - ग'** इति एते गणाः भवन्ति ।

- यत्र एते गणाः भवन्ति तत्र **'इन्द्रवज्रानामकं'** छन्दः भवति ।

**इन्द्रवज्राच्छन्दोलक्षणम् -**

१. श्लोके पादचतुष्टयं भवति ।

२. क्रमशः त-त-ज-ग-ग-इति गणाः भवन्ति ।

३. प्रतिपादम् एकादशाक्षराणि भवन्ति ।

**स्यादिन्द्रवज्रा यदि तौ जगौ गः**

### आ) अधः दत्तस्य श्लोकस्य गुरुलघुनिरूपणपुरस्सरं, सोदाहरणं गणविभजनं कुर्वन्तु ।

**स्वस्ति प्रजाभ्यः परिपालयन्तां**
**न्याय्येन मार्गेण महीं महीशाः ।**
**गोब्राह्मणेभ्यश्शुभमस्तु नित्यं**
**लोकास्समस्तास्सुखिनो भवन्तु ॥**

© SCERT not to be republished

## इ) अधः दत्तं वाक्यं पठन्तु । अवगच्छन्तु ।

**धूमस्तोमं तमश्शङ्के कोकीविरहशुष्मणाम्**

- अत्र धूमसमूहं दृष्ट्वा अत्यन्तनीलतायाः कारणेन तत्समानस्य तमसः संभावनात् उत्प्रेक्षालङ्कारः भवति ।

**विवरणम्** - वर्णनीयं विषयं परिशील्य तत्समानः अन्यः विषयः यत्र चमत्कारजनकतया ऊह्यते (सम्भाव्यते) तत्र **"उत्प्रेक्षालङ्कारः"** भवति।

**लक्षणम्** - "सम्भावना स्यात् उत्प्रेक्षा" ।

## ई) अधः दत्तस्य वाक्यस्य दत्तान् प्रश्नान् आधारीकृत्य अलङ्कारनिरूपणं कुर्वन्तु ।

**१. अप्सरसः कोमलौ पादौ भुविविक्षेपणात् रक्तवर्णौ ध्रुवम् अभवताम्** ।

क) कौ भुवि विक्षेपितौ ?

ख) विक्षेपणेन कौ कथमभवताम् ?

ग) रक्तवर्णौ कथम् अभवताम्?

घ. अयं कः अलङ्कारः ?

ञ. उत्प्रेक्षालङ्कारे के के अंशाः सन्ति ?

## उ. अधः दत्तस्य वाक्यस्य अलङ्कारनिरूपणं कुर्वन्तु ।

**त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशी** ।

### परियोजनाकार्यम्

1. स्वपरिचितान् चाटुश्लोकान् स्वीकृत्य एकां सूचिकां कुर्वन्तु ।

(अथवा)

2. आन्ध्रभाषायां विद्यमानानि चाटुपद्यानि सङ्कलन्तु । कक्ष्यायां प्रदर्शयन्तु ।

### विषयविस्तरः

चाटुश्लोकरचना एका विनोदात्मिका बुद्धिविकासात्मिका साहित्यप्रक्रिया । साधारणतया चाटुश्लोकेषु अर्थद्वयं भवति । एकः बहिरङ्गार्थः । एकः आन्तरिकार्थः। अर्थद्वयावबोधनेन मनोल्लासः भवति । प्राचीनकालादारभ्य एषा प्रक्रिया भाषायामस्ति । कदाचित् अन्वयकाठिन्यमपि अत्र भवति । अन्वयज्ञानेनैव अर्थावगमः भवति । तेन मनोरञ्जनं भवति । एषा क्लिष्टा श्लोकरचना प्रक्रिया ।

© SCERT not to be republished